# संस्कृत वार्ता:

दिनाङ्क : 01/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- असम-राज्ये विधानसभा-निर्वाचनस्य प्रचारः तीव्रः अभवत्। प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी गोगामुख-नगरे जनसभां सम्बोधयन् उक्तवान् यत् निर्धनानां मध्यमवर्गस्य च कल्याणं दलस्य सर्वोच्चप्राथमिकता अस्ति।
- सर्वकारेण आश्वासितं यत् सम्पूर्णे देशे सर्वाणि सस्यबीजानि पर्याप्त-मात्रायाम् उपलभ्यन्ते।
- राज्यसभायां केन्द्रीय-सशस्त्र-आरक्षक-बल- विधेयक: स्वीकृत:।
- वस्तु-सेवा-कर-सङ्ग्रहः अष्ट दशमलवोत्तर अष्ट प्रतिशतं यावत् वृद्धिं प्राप्य मार्चमासे द्विलक्षकोटिरूप्यकाणि अतिक्रमितः, षड्विंशत्यधिक द्विसहस्रतमे वित्तवर्षे त्रीणि दशमलवोत्तर अष्ट प्रतिशतं यावत् वृद्धिमवाप्नोत्।
- एशियन्-बाक्सिङ्ग्-चैम्पियन्शिप्-क्रीडायां भारतस्य सचिन सिवाचः, विश्वनाथ सुरेशः च प्रगुपान्त्य चक्रीयद्वन्द्वे प्रविष्टवन्तौ ।

-----------------------------------------------------

<u>प्रधानमन्त्री-असम</u>

प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी अद्य अवदत् यत् निर्धनानां मध्यमवर्गस्य च कल्याणमेव दलस्य सर्वोच्चप्राथमिकता अस्ति। असम-राज्यस्य गोगामुख-नगरे निर्वाचनसमारोहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् सर्वसमावेशक-विकासाय भाजपेति दलम् अवसंरचनाक्षेत्रे, शिक्षायाम्, स्वास्थ्यसेवायां च निरन्तरं अवधानं प्रदत्तवान् ।

श्रीमोदी अवदत् यत् असम-राज्ये एन्. डी. ए-शासनस्य गतदशवर्षेषु राज्ये महती प्रगतिः अभवत्। सः अग्रे अवदत् यत् "डबल्-इञ्जिन्" सर्वकारः राज्ये चिरस्थायी शान्तिं आनेतुं साहाय्यं कृतवान्, बहवः युवकाः हिंसातः अधिकसुरक्षितं भविष्यं प्रति गच्छन्तः सन्ति। असम-राज्यं चायेत्यस्य कृते जगति प्रसिद्धम् अस्ति इति प्रधानमन्त्री अवदत्, अपि च मोरिगांव-नगरे

आगामिनः सेमिकण्डक्टर्-प्लाण्ट् इत्यनेन सह राज्यं शीघ्रमेव सेमिकण्डक्टर्-चिप्स् इत्यस्य कृते ज्ञायते।

---------------------------------------------------------

## अन्तामन्त्रालय-संवादः

नवदेहल्यां 'पश्चिम-एशिया-सङ्घर्षस्य' प्रभावानां समीक्षां कुर्वन् भारत-सर्वकारेण अद्य सुदृढाश्वासनं दत्तम्। कृषि-मन्त्रालयस्य अवर-सचिवा डॉ. मनिन्दर कौर द्विवेदि अद्य उक्तवती यत् देशे सर्वेषां सस्यानां बीजानि पर्याप्तरूपेण उपलब्धानि सन्ति। तया सूचितं यत् पंचाशीत्यधिकैकशत लक्ष-क्विण्टल् परिमितानि खरीफ-शस्य-बीजानि तथा च खरीफ-ऋतौ आवश्यकस्य उर्वरकस्य भागः 'ओपनिंग स्टॉक' इति रूपेण सञ्चितः अस्ति।

---------------------------------------------------------

## लोकसभायाम् अश्विनी-वैष्णवस्य सम्बोधनम्

लोकसभायां अद्य प्रश्नकाल-समये पूरक-प्रश्नानां उत्तरं यच्छन् रेलमन्त्री अश्विनी-वैष्णवः न्यगादीत् यत् रेल-विभागाय अस्मिन् वर्षे 'अंकीय आयं' आवंटितम्। अनेन देशस्य प्रत्येकः नागरिकः, विशेषतः निर्धनाः मध्यमवर्गीय-जनाः च लाभान्विताः भविष्यन्ति। मन्त्रिणा स्पष्टीकृतं यत् विगत-दशके रेल-क्षेत्रे कृतेन बृहत् निवेशेन देशस्य रेल-जालस्य आधुनिकीकरणं जातं, यस्य प्रत्यक्ष-लाभः सामान्य-जनानां यात्रा-सुविधासु दृश्यते।

---------------------------------------------------------

## उपराष्ट्रपतिः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य अवदत् यत् संविधान-सदनस्य अष्टपञ्चाशत् भित्तिचित्राणि केवलं कलाकृतयः न सन्ति, तानि भारतस्य सभ्यता-यात्रां प्रदर्शयन्ति। श्रीराधाकृष्णन् वर्यः नवदेहली-नगरे राज्यसभायाः सदस्या सुधा मूर्तिना लिखितस्य पुस्तकस्य, टाईड्स् आफ् टाइम् इत्यस्य विमोचनं कुर्वन् एतत् उक्तवान्। राधाकृष्णन् वर्यः अवदत् यत्

लोकतन्त्रं प्रायः आधुनिक-व्यवस्थारूपेण दृश्यते यत् पश्चिमदेशात् आगतम्। सः अवदत् यत् भारतस्य प्राचीनाः ग्रन्थाः स्पष्टतया साक्ष्यं ददति यत् देशे लोकतन्त्रस्य परिकल्पना नूतना नास्ति।

---

## नूतन-वित्तीय-वर्षस्य आर्थिक परिष्कारः

अद्यतन-नूतन-वित्तीय-वर्षात् देशे अनेके महत्त्वपूर्णाः आर्थिकपरिष्काराः प्रवृत्ताः। षड्-दशकेभ्यः पुरातनस्य 'आयकर-अधिनियमस्य' स्थाने अद्यतनः पंचविंशत्युत्तरद्विसहस्रतमवर्षस्य नूतन-आयकर-अधिनियमः प्रवृत्तो जातः। अस्य मुख्य-उद्देश्यं कर-प्रणाल्याः सरलीकरणं, पुरातन-नियमानां निष्कासनं तथा च करदातृणां कृते अनुपालनं सुगमं करणम् अस्ति। भारतीय-रिजर्व-बैंक इत्यस्य निर्देशानुसारं अद्य आरभ्य सर्वेभ्यः 'डिजिटल'-व्यवहारेभ्यः 'द्वि-स्तरीय-प्रमाणीकरणम्' अनिवार्यं भविष्यति। अपि च, 'फास्टैग' वार्षिक-शुल्कस्य नूतनाः नियमाः तथा च 'पैन-कार्ड' निर्माणस्य अद्यतनीकरणस्य च परिष्कृताः नियमाः अपि अद्य आरभ्य कार्यान्वितम् अभवन्।

---

## वाणिज्य-एल.पी.जी.मूल्यवृद्धिः

पश्चिम-एशिया-सङ्घर्षस्य प्रभावेण तैल-विपणिभिः वाणिज्य-एल.पी.जी. मूल्ये पंचदशोत्तरैकशततोप्यधिक रूप्यकाणां वृद्धिः कृता। 'इण्डियन ऑयल' मन्त्रालयस्य सूचनानुसारं, नवदेहल्यां एकादश किलोग्राम-परिमितस्य वाणिज्य-कोषस्य मूल्यम् अधुना अष्टोत्तरद्विशताधिक द्विसहस्र
रूप्यकाणि अभवत्। एवमेव कोलकात्ता-नगरे अष्टाधिक द्विशतोत्तर द्विसहस्र रूप्यकाणि, मुम्बई-नगरे एकत्रिंशदधिक द्विसहस्र रूप्यकाणि तथा च चेन्नै-नगरे प्रायः त्रिसहस्र रूप्यकाणि निर्धारितम्। एते नूतनाः नियमा: अद्य आरभ्य प्रभाविनः सन्ति। उल्लेखनीयं यत् गार्हस्थ्य-एल.पी.जी. कोषाणां मूल्ये किमपि परिवर्तनं न कृतम्। सर्वकारेण स्पष्टीकृतं यत् उद्योगेषु

उपयुज्यमानानां वाणिज्य-कोषाणां मूल्यं 'विपणन-आधारितं भवति, यस्य समीक्षा प्रतिमासं क्रियते।

------------------------------------------------------

## राज्यसभा- विधेयकः

राज्यसभया अद्य 'केन्द्रीय-सशस्त्र-आरक्षक-बल-विधेयकं ध्वनि-मतेन पारितम्। गृह-राज्यमन्त्री नित्यानन्द रायः गतसप्ताहे एतत् विधेयकं प्रस्तुतवान्, यस्य मुख्य-उद्देश्यं 'ग्रुप-ए' सामान्य-कर्तव्य-अधिकारिणां नियुक्ति-सेवा-अनुशंसानां च नियमनं करणीयम् अस्ति।

------------------------------------------------------

## वस्तु-सेवा-करसङ्ग्रहः

अस्मिन् वर्षे मार्च-मासे वस्तु-सेवा-करस्य आहत्य सङ्ग्रहः गतवर्षस्य तुलनया अष्ट दशांश अष्ट प्रतिशतं वर्धित्वा द्वि-लक्ष-कोटि-रूप्यकाणाम् स्तरम् अधिगतम् । गतवर्षे मार्च-मासे एषः सङ्ग्रहः एक दशांश अष्ट त्रिणी लक्ष-कोटि-रूप्यकाणि आसीत्। अपरपक्षे, कृत्स्ने वित्तीय-वर्षे आहत्य-राजस्वं द्वाविंशति लक्ष-कोटि-रूप्यकाणि प्राप्तम्, यत् गतवर्षस्य तुलनायाम् अष्ट दशांश त्रिणी प्रतिशतं अधिकम् अस्ति। एषा वृद्धिः भारतीय-अर्थव्यवस्थायाः सुदृढतां कर-अनुपालनस्य विकासं च दर्शयति।

------------------------------------------------------

## संयुक्त-राष्ट्र-सङ्घः, बलूच-महिला-मञ्चस्य आह्वानम्

मानवाधिकार-समूहः बी. डब्लू. एफ इति 'बलूच-महिला-मञ्चः'. अन्तर्राष्ट्रीय-समुदायं प्रति पाकिस्तान-देशं बलूचिस्ताने निरन्तरं 'बलात्-अन्तर्धानं' तथा च 'न्यायेतर-हत्यायाः कृते उत्तरदायिनं कर्तुं साग्रहं प्रार्थितवान्। जिनेवा-नगरे संयुक्त-राष्ट्र-मानवाधिकार-परिषदः एकषष्टिः -तमे सत्रे आभासीय-माध्यमेन भाषमाणा बलूच-कार्यकर्त्रि शाली बलूचः सम्पूर्ण-बलूचिस्ताने जायमानानां मानवाधिकार-उल्लङ्घनानां विषये विश्वस्य ध्यानम् आकृष्टवती।

---

<u>ऋतुविभागः</u>

भारत-ऋतु-विभागेन आई. एम्. डी. इत्यनेन श्वः पर्यन्तं छत्तीसगढ-महाराष्ट्र-तेलङ्गाना-प्रदेशेषु ओलावृष्ट्या सह मेघवृष्टेः पूर्वानुमानं कृतम् अस्ति। अद्य मेघालय-असम-राज्ययोः, श्वः यावत् अरुणाचलप्रदेशे च प्रचण्डवृष्टेः विभागेन पूर्वानुमानं प्रकटितम् अस्ति। ऋतु विभागेन असम, मेघालय, ओडिशा, तेलङ्गाना इत्येतेषु राज्येषु दिने मेघगर्जनस्य विद्युद्-द्योतनस्य च पूर्वानुमानं कृतम्। शुक्रवासरं यावत् वायव्यभारते अधिकतमं तापमानं क्रमेण द्वि तः चत्वारि डिग्री सेल्सियस् यावत् वर्धयिष्यति इति विभागेन उक्तम्। एतदतिरिच्य, श्वः पर्यन्तं विदर्भे, छत्तीसगढराज्ये, महाराष्ट्रे, देशस्य पूर्वभागे च अधिकतमेषु तापमानेषु द्वि तः चत्वारि डिग्री सेल्सियस् यावत् न्यूनातागमिष्यति।

---

<u>आईपीएल</u>

अद्य लखनऊ-नगरस्य भारतरत्न श्रीअटल बिहारी वाजपेयी एकाना क्रिकेट-क्रीडाङ्गणे, पञ्चमे द्वन्द्वे लखनऊ-सुपर-जायन्ट्स्-दलेन दिल्ली-कैपिटल्स-दलं सम्मुखीक्रियते। इयं क्रीडा सायं सार्धसप्तवादने आरप्स्यते ।

---

<u>एशियन्-बाक्सिङ्ग्-</u>

एशियन्-बाक्सिङ्ग्-चैम्पियन्शिप्-क्रीडायां भारतस्य सचिन सिवाचः,

विश्वनाथ सुरेशः च अद्य मङ्गोलिया-देशस्य उलानबाटार-नगरे प्रगुपान्त्यचक्रीय क्रीडायां प्रविष्टवन्तौ।

।। इति वार्ता: ।।